अध्याय :- २७ chapter-27

नारद उवाच ।।[1]
ततो निरुपमं दिव्यं सर्वरत्नमयं शुभम्[2] ।।
ईशाननिर्मितं साक्षात्सह देव्याविशद्गृहम् ।। १

तत्रासौ मंदिरगिरौ सह देव्या भगाक्षहा ।।
प्रासादे तत्र चोद्याने रेमे संत्दृष्टमानसः ।। २

एतस्मिन्नंतरे देवास्तारकेणातिं पीडिताः ।।
प्रोत्साहितेन चात्यर्थं मया कलिचिकीर्षुणा ।। ३

आसाद्य ते भवं देवं तुष्टुवुर्बहुधा स्तवैः ।।
एतस्मिन्नंतरे देवी प्रोद्वर्तयत गात्रकम् ।। ४

उद्वर्तनमलेनाय नरं चक्रे गजाननम् ।।
देवानां संस्तवैः पुण्यैः कृपयाभिपरिप्लुता ।। ५

पुत्रेत्युवाच तं देवी ततः संत्दृष्टमानसा ।।
एतस्मिन्नंतरे शर्वस्तत्रात्य वचोऽब्रवीत ।। ६

पुत्रस्तवायं गिरिजे शृणु यादृग्भविष्यति ।।
विक्रमेण च वीर्येण कृपया सदृशो मया ।। ७

---

१ ब. श्री नारद उ ब ।।
२ ब. शुभं

यथाहं तादृशाश्चासौ पुत्रस्ते भविता गुणैः ।।
ये च पापा दुराचारा वेदान्धर्मं द्विषंति च[१] ।। ८

तेषामामरणांतानि विघ्नान्येषा करिष्यति ।।
ये च मां नैव मन्यंते विष्णुंचापि जगद्गुरुम् ।। ९

विघ्निता विघ्नराजेन ते यास्यंति महत्तमः ।।
तेषां गृहेषु कलहः सदा नैवोपशाम्यति ।। १०

पुत्रस्य तव विघ्नेन समूलं तस्य नश्यति ।।
येषां न पूज्याः पूज्यंते क्रोधासत्य पराश्च ये ।। ११

रौद्रसाहसिका ये च तेषां विघ्नं करिष्यति ।।
श्रुतिधर्मान्ज्ञाति धर्मान्पालयंति गुरुंश्च ये ।। १२

कृपालवोगत क्रोधास्तेषां विघ्नं हरिष्यति ।।
सर्वे धर्माश्च कर्माणि तथा नानाविधानि च ।। १३

सविघ्नानि भविष्यंति पूजयास्य विना शुभे ।।
एवं श्रुत्वा उमा प्राह एवमस्त्विति शंकरम् ।। १४

---

१ ब. प्रती "ये" पाठः ।

ततो बृहत्तनुः सो/भूत्तेजसा द्योतयन्दिशः ।।
ततो गणैः समं शर्वः सुराणां[२] प्रददौ च तम् ।।
यावत्तार कहंता वो[३] भवेत्तावदयं प्रभुः ।। १५

ततो विघ्नपतिर्दैवैः संस्तुतः प्रणतार्तिहा ।।
चकार तेषां कृत्यानि विघ्नानि दिति जन्मनाम् ।। १६

पार्वती च पुनर्देवी पुत्रत्वे परिकल्प्य च ।।
अशोकस्यांकुरं वार्भिरवर्द्धयत[४] स्वात्सदतैः ।। १७

सप्तर्षीनिथ चाहूय संस्कार मंगलं तरोः ।।
कारयामास तन्वंगी ततस्तां मुनयो/ब्रुवन् ।। १८

त्वयैव दर्शिते मार्गे मर्यादां कर्तुमर्हसि ।।
किं फलं भविता देवि कल्पितैस्तरुपुत्रकैः ।। १९

देव्युवाच ।।[५]
यो वै निरुदके ग्रामे कूपं कारयते बुधः ।।
यावत्तोयं भवेत्कूपे तावत्स्वर्गे स मोदते ।। २०

दशकूपसमा वापी दशवापी समं सरः ।।
दशसरः समा कन्या दशकन्यासमः क्रतुः ।। २१

---

१ ब. बृहतनू
२ ब. सुरणां
३ ब. प्रतौ "रो " पाठः ।
४ ब. निरैरवर्धयत
५ ब. श्री देव्युवाच ।।

दश ऋतुसमः पुत्रो दशपुत्रसमो द्रुमः ।। २२

एषैव मम मर्यादा नियता लोक भाविनी ।।
जीर्णोद्धारे कृते चापि फलं तद्द्विगुणं मतम् ।। २३

इति गणेशोत्पत्तिः ।।[1]
ततः[2] कदाचिद्भगवानुमया सह मंदरे ।।
मंदिरे हर्षजनने कलधौतमये शुभे ।। २४

प्रकीर्ण कुसुमा मोदमहालिकुल कूजिते ।।
किंनरोद्यगीत संगीत प्रतिशब्दितमध्यके ।। २५

क्रीडामयूरैर्हंसैश्च श्रुतिश्चैवा भिनादिते ।।
मौक्तिकै र्विविध रत्नैर्विनिर्मित गवाक्षके ।। २६

तत्र पुण्य कथाभिश्च क्रीडतो रुभयोस्तयोः ।।
प्रादुरभून्महान्छन्दः पूरितांबर गोचरः ।। २७

तं श्रुत्वा कौतुकादेवी[3] किमेत दिति शंकरम् ।।
पर्यपृच्छच्छुभतनुर्हरं विस्मय पूर्वकम् ।। २८

---

१ इति..... पत्तिः ।। ब. प्रतौ इत्ययं पाठः नास्ति ।
२ ब. सतः
३ ब. मा

तामाह देवीं गिरिशो दृष्टपूर्वास्तु ते त्वया ।।
एते गणा मे क्रीडंति शैलेऽस्मिस्त्वत्प्रियाः शुभे ।। २९

तपसा ब्रह्मचर्येण क्लेशन क्षेत्र साधनैः ।।
यैरहं तोषितः पृथ्व्यां त एते मनुजोत्तमाः ।। ३०

मतसमीपमनुप्राप्ता मम लोकं वरानने ।।
चराचरस्य जगतः [1]सृष्टि संहारण क्षमाः ।। ३१

विनैतान्नैव मे प्रीतिर्निभिर्विरहितो रमे ।।
एते अहमहं चैते तानि तान्पश्य पार्वती[2] ।। ३२

इत्युक्ता विस्मिता देवी ददृशे तान्गवाक्षके ।।
स्थिता पद्मपलाशाक्षी महादेवेन भाषिता[3] ।। ३३

केचित्कृशा ह्रस्वदीर्घाः केचित्स्थूल महोदराः ।।
व्याघ्रभमेषाजमुखा नानाप्राणि महामुखाः ।। ३४

व्याघ्रचर्म परीधाना नग्ना ज्वालामुखाः[4] परे ।।
गोकर्णा गजकर्णाश्च बहुपादमुखे क्षणाः ।। ३५

---

१ "क्ष्टि संहरण क्षमा" ब. पाठः ।
२ अ. पार्वति
३ ब. ताः
४ ब. मुखा

विचित्रवाहनाश्चैव नानायुध धरास्तथा ।।
गीतवाद्यित्र तत्वज्ञाः सत्वगीत रसप्रियाः ।। ३६

तान्दृष्ट्वा पार्वती प्राह कतिसंख्याऽभिधास्त्वमी ।। ३७

श्री शंकर उवाच ।।
असंख्ये यास्त्वमी देवि असंख्येयाभिधास्तथा ।।
[1]जगदापूरितं सर्वमेते भीमैर्महाबलैः[2] ।। ३८

सिद्ध क्षेत्रेषु रथ्यासु जीर्णोद्यानेषु वेश्मसु ।।
दानवानां शरीरेषु बालेषून्मत्तकेषु च ।। ३९

एते विशंति मुदिता नानाहार विहारिणः[3] ।।
ऊष्मपाः फेनपाश्चैव धूम्रपा मधुपायिनः ।। ४०

गीत नृत्योपहाराश्च नानावाद्यरवप्रियाः ।।
अनंतत्वादमीषां च वक्तुं शक्या न वैगुणाः ।। ४१

श्री देव्युवाच ।।[4]
मनः शिलेन कल्केन य एष च्छुरिताननः ।।
तेजसा भास्कराकारो रूपेण सद्दशस्तव ।। ४२

---

१ ब. जगता....
२ ब. बले
३ ब. "णा"
४ ब. श्री देव्यु०

आकर्ण्याकर्ण्य ते देव [1]गणैर्गीतान्महागुणान् ।।
मुहुर्नृत्यति हास्यं च विदधाति मुहुर्मुहः ।। ४३

सदाशिव शिवेत्येवं विह्वलो वक्ति यो मुहुः ।।
धन्योऽयमीदृशो यस्य भक्तिस्त्वयि महेश्वरे ।। ४४

एन विज्ञातुमिच्छामि किंनामासौ गणस्तव ।।
श्री शंकर उवाच ।।
स एष वीरको देवि सदा मेद्रिसुते प्रियः ।। ४५

नानाश्चर्य गुणाधारः प्रतीहारो मतोऽम्बिके ।।
देव्युवाच ।।[2]
इदृशस्य सुतस्यापि ममोत्कंठा पुरांतक ।। ४६

कदाहमीदृशं पुत्रं लप्स्याम्यानंददायकम् ।।
शर्व उवाच ।।
एष एव सुतस्तेस्तु यावदीदकपरो भवेत् ।। ४७

इत्युक्ता विजया[3] प्राह शीघ्रमानय वीरकम् ।।
विजया च ततो गत्वा वीरकं वाक्यमब्रवीत् ।। ४८

एह्येहि वीरक ते देवी गिरिजा तोष्मिता शुभा ।।
त्वामाह्वयति सा देवी भवस्यानुमते स्वयम् ।। ४९

---

१ ब. गुणोगीता
२ ब. श्री देव्यु० ।।
३ ब. विजया

इत्युक्तः संभ्रमयुतो मुखं संमार्ज्य पाणिना ।।
देव्याः[१] समीपमागच्छज्जयया/नुगतः शनैः ।। ५०

तं दृष्ट्वा गिरिजा प्राह गिरा मधुरवर्णया ।।
एह्येहि पुत्र क्लतस्त्वं भवेन मम पुत्रकः ।। ५१

इत्युक्तो दंडवद्देवीं प्रणम्यावस्थितः क्षुरः[२] ।।
माता ततस्तमालिंग्य कृत्वोत्संगे च वीरकम् ।। ५२

चुचुंबकं च कपाले तं गात्राणि च प्रमार्जयत् ।।
भूषयामास दिव्यैस्तं स्वयं नाना विभूषणैः ।। ५३

एवं संकल्प्य तं पुत्रं लालयित्वा उमाचिरम् ।।
उवाच पुत्र क्रीडेति श्र गच्छ सार्धं गणैरिति ।। ५४

ततश्चिक्रीड मध्ये स गणानां पार्वतीसुतः ।।
मुहुर्मुहुः स्वमनसि स्तुवन्भक्तिं स शांकरीम् ।। ५५

प्रणम्य सर्वभूतानि प्रार्थयाम्यस्मि दुष्करम् ।।
भक्त्या भजध्वमीशानं यस्या भक्ते रिदं फलम् ।। ५६

---

१ ब. देव्या
२ क्री प्रती "क्षुरः" पाठः ।

क्रीडितुं वीरके याते ततो देवी च पार्वती ।।
नानाकथाभिश्च क्रीड पुनरेव जटाभृता ।। ५७

ततो गिरि सुता कण्ठे क्षितबाहुर्महेश्वरः ।।
तपसस्तु विशेषार्थं नर्म देवीं किलाब्रवीत् ।। ५८

स हि गौरतनुः शर्वो विशेषाच्छशिशोभितः ।।
रंजिता[1] च विभावर्या देवी नीलोत्पलच्छविः ।। ५९

शर्व उवाच ।।
शरीरे मम तन्वंगी सिते भास्य सितद्युतिः ।।
भुजंगीवासिता शुभ्रे संश्लिष्टा चन्दने तरौ[2]।। ६०

चंद्रज्योत्स्नाभि संपृक्ता तामसी रजनी यथा ।।
रजनी वा सिते पक्षे दृष्टिदोषं ददासि मे ।। ६१
इत्युक्ता गिरिजा तेन कण्ठं[3] शर्वाद्विमुच्य सा ।।
उवाच कोपरक्ताक्षी भृकुटी विकृतानना ।। ६२

स्वकृतेन जनः सर्वो जनेन परिभूयते ।।
अवश्यमर्थी[4] प्राप्नोति खण्डनां शशिखंडभृत् ।। ६३

---

१ ब. रंढीता
२ ब. तरौ
३ ब. कंठं
४ ब. अवशमर्थ्री

ततोभिदीप्त चरितैर्यत्त्वां प्रार्थितवत्यहम् ।।
तस्य मे नियमस्यै वमवमानः पदेपदे ।। ६४

नैवाहं कुटिला शर्व विषमा न च धूर्जटे ।।
स्वदोषैस्त्वं गतः क्षांतिं तथा दोषाकरश्रियः ।। ६५

नाहं मुष्णामि नयने नेत्रहंता भवान्भव ।।
भगस्तते विजानाति * तथैवेदं जगत्त्रयम् ।। ६६

मूर्ध्नि शूलं जनयसे स्वैर्दोषैर्मामधिक्षिपन् ।।
यत्त्वं मामाह कृष्णेति महाकालोऽसिविश्रुतः ।। ६७

यास्याम्यहं परित्यक्तुमात्मानं तपसा गिरिम् ।।
जीवंत्या नास्ति मे कृत्यं धूर्तेन परिभूतया ।। ६८

निशम्य तस्या वचनं [1]कोपतीक्ष्णाक्षरं भवः ।।
उवाचाथ च संभ्रांतो दुर्ज्ञेय चरितो हरः ।। ६९

न तत्त्वज्ञासि गिरिजे नाहं निंदा परस्तव ।।
चाटूक्ति बुद्ध्या कृतवांस्तवाहं नर्म कीर्तनम् ।। ७०

---

१ ब. कोपिती क्षणं भवः" इति स्यात् ।

विकल्पः[१] स्वच्छचित्तेति गिरिजेष्या मम प्रिया ।।
प्रायेण[२] भूतिलिप्तानामन्यथा चिंतिता त्वदि ।। ७१

अस्मादशानां कृष्णांगि प्रवर्तते ऽन्यथा गिरः ।।
यद्येवं कुपिता भीरु न ते वक्ष्याम्यहं पुनः ।।७२

नर्मवादी भविष्यामि जहि कोपं शुचिस्मिते ।।
शिरसा प्रणतस्ते ऽहं रचितस्ते मयांजलिः ।। ७३

दीनेनाप्यपमानेन निंदितो नैमि विक्रियाम् ।।
वरमस्मि विनम्रो ऽपि न त्वं देवि गुणान्विता ।। ७४

इत्यनेकैश्चाटुवाक्यैः सूक्तैर्देवेन बोधिता ।।
कोपं तीव्रं न तत्याज सती मर्मणि घट्टिता ।। ७५

अवष्टब्धावथ क्षिप्त्वा पादौ शंकरपाणिना ।।
विपर्यस्तालका वेगाद्गन्तुमैच्छत शैलजा ।। ७६

तस्यां व्रजन्त्यां कोपेन पुनराह पुरांतकः ।।
सत्यं सर्वैरवयवैः सुतेति सदृशी पितुः[३] ।। ७७

---

१ ब. प
२ ब. "भूणभूत लिप्ता" इति स्यात् ।
३ ब. पितु

हिमाचलस्थ शृंगैस्तैमेर्घ मालाकुलैर्मनः ।।
तथा दुरवगाहवोऽसौ हृदयेभ्यस्तवाशयः ।। ७८

काठिन्यं कष्टमस्मिंस्ते वनेभ्यो बहुधा गतम् ।।
कुटिलत्वं नदीभ्यस्ते दुःसेव्यत्वं हिमादपि ।। ७९

संक्रांतं सर्वमेवैतत्तव देवि हिमाचलात् ।।
इत्युक्ता सा पुनः प्राह गिरिशं शैलजा तदा ।। ८०

कोपिकंपितधूम्रास्या प्रस्फुरद्रशनच्छदा ।।
मा शर्वात्मोपमानेन निंदत्वं गुणिनो जनान् ।। ८१

तवापि दुष्टसंपर्कोत्संक्रांतं सर्वमेव हि ।।
व्यालेभ्योऽनेकजिह्वत्वं भस्मनः स्नेहबन्ध्यता ।। ८२

हृत्कालुष्यं शशांकात्ते दुर्बोधत्वं वृषादपि ।।
अथवा बहुनोक्तेन अलं वाचा श्रमेण मे ।। ८३

स्मशानवास[1] आसीस्तवं[2] नग्नत्वान्न तवत्रपा ।।
निर्घृणत्वं कपालित्वादेवं कः शक्नुयात्तव ।। ८४

*३
इति श्री स्कांदे महापुराण..........पार्वतीप्रकोप वर्णनं नाम
सप्तविंशोऽध्यायः ।।

---

१ ब. वासा
२ ब. चाभीस्त्वं
*३ इति श्री स्कंद पुराणे कुमारिका खंडे पार्वति प्रकोपः सप्तविंशोऽध्यायः ।।